# केन्द्रीयसंस्कृतविश्वविद्यालयः

संसदः अधिनियमेन स्थापितः

(प्राक्तनं राष्ट्रियसंस्कृतसंस्थानम्, भारतसर्वकारस्य शिक्षामन्त्रालयाधीनम्)

56-57, सांस्थानिकक्षेत्रम्, जनकपुरी, नवदेहली – 110058

दूरभाषसङ्ख्या – 011 -28524993, 28524995, 28520979, 28520966

अन्तर्जालपुटम् - www.sanskrit.nic.in

**अधिसूचनायाः दिनाङ्कः – 07.11.2022**

## संस्कृतसंवर्धनयोजनानाम् उपलक्ष्ये 2022-23 वर्षस्य कृते वित्तीयसहायतायाः प्रदानार्थम् अन्तर्जालमाध्यमेन आवेदनपत्राणाम् आमन्त्रणम्

संस्कृतस्य संवर्धनाय केन्द्रीयसंस्कृतविश्वविद्यालयेन सञ्चाल्यमानानां भारतसर्वकारस्य शिक्षामन्त्रालयस्य निम्नलिखितानां केन्द्रीययोजनानाम् उपलक्ष्ये 2022-23 वर्षस्य कृते वित्तीयसहायतायाः प्रदानार्थं सर्वकारेतरसंस्थाभिः /स्वैच्छिकसङ्घटनैः /संस्थाभिः /विश्वविद्यालयैः /प्रकाशकैः /वैयक्तिकरूपेण /छात्रद्वारा अन्तर्जालमाध्यमेन आवेदन-पत्राणाम् आमन्त्रणं क्रियते –

| क्र. सङ्ख्या | योजनायाः नाम | अन्तर्जालपञ्जीकरणस्य तिथिः | |
|---|---|---|---|
| | | आरम्भतिथिः | अन्तिमतिथिः |
| 1 | **संस्कृतशिक्षणम्** - पारम्पारिकसंस्कृतपाठशालासु/महाविद्यालयेषु/चतुष्पाठिसंस्थासु संस्कृतविषयकाध्यापकानाम् अथवा आधुनिकविषयकाध्यापकानां व्यवस्था आवासीयच्छात्रवृत्तिश्च | 07.11.2022 | 10.12.2022 |
| 2 | **सम्मानराशिः**– अभावग्रस्तपरिस्थितिषु स्थीयमानानां संस्कृतपण्डितानां कृते | | |
| 3 | **संस्कृतसंवर्धनाय कार्यक्रमाः/ गतिविधयः** | | |
| 4 | **संस्कृतस्य पुस्तकप्रकाशनं, सामूहिकक्रयणं दुर्लभग्रन्थानां पुनर्मुद्रणञ्च** | | |
| 5 | **शास्त्रचूडामणिः**–शास्त्रविदुषाम् एवम्/अथवा सेवानिवृत्तानां संस्कृतविदुषां सेवानाम् उपयोगार्थम् | | |
| 6 | **पञ्जीकृतासु पारम्पारिकसंस्थासु अध्ययनरतानां छात्राणां कृते व्यावसायिकप्रशिक्षणम्** | | |
| 7 | **अष्टादशी**– संस्कृतसंवर्धनाय अष्टादशपरियोजनाः | | |
| 8 | **मेधावी-छात्रवृत्तिः**– संस्कृत-पालि-प्राकृतभाषासु नवमीकक्षातः विद्यावारिधिपर्यन्तं पारम्परिक-आधुनिकधारायां नियमितरूपेण अध्ययनरतानां छात्राणां कृते | 10.11.2022 | 31.01.2023 |

उपर्युक्तानां योजनानां कृते आवेदनं केवलम् अन्तर्जालमाध्यमेनैव (Online mode only) स्वीक्रियते। अन्येन माध्यमेन प्राप्तानि आवेदनानि न स्वीक्रियन्ते । परन्तु प्रत्येकं योजनायाः दिशानिर्देशानुसारं प्रकाशनसामग्र्यः / पुस्तकानि / अनिवार्यपत्राणि अन्तर्जाले प्रपूरितस्य आवेदनपत्रस्य प्रतिलिप्या सह पृथग्रूपेण पञ्जीकृतपत्राचारमाध्यमेन (Registered Post) पञ्जीकरणस्य अन्तिमतिथेः 15 दिनाभ्यन्तरे **"निदेशकः (केन्द्रीययोजनाः), (.....योजनायाः नाम....), केन्द्रीयसंस्कृतविश्वविद्यालयः, 56-57, सांस्थानिकक्षेत्रम्, जनकपुरी, नवदेहली -110058"**इति पत्रसङ्केतं प्रति प्रेषणीयानि भवन्ति । अतः आवेदनपत्रस्य प्रपूरणात् प्राक् योजनानां दिशानिर्देशाः अवश्यं पठनीयाः । प्रत्येकं योजनायाः दिशानिर्देशाः, आवश्यकपत्राणि, मानदेयराशिः, अन्तर्जालमाध्यमेन आवेदनप्रक्रिया, आवेदनपत्रस्य अग्रेसरणप्रक्रिया इत्यादीनां विषये विस्तृतज्ञानार्थं केन्द्रीयसंस्कृतविश्वविद्यालयस्य अन्तर्जालपुटं **www.sanskrit.nic.in/schemes** अवलोकयन्तु । कस्याः अपि योजनायाः विषये स्पष्टीकरणार्थम् अथवा संशयनिवारणार्थम् उपरि प्रदत्तदूरभाषसङ्ख्यया अथवा पत्राचारसङ्केतद्वारा उत ई-मेल help.schemes@csu.co.in माध्यमेन सम्पर्कयितुं शक्नुवन्ति ।

हस्ता/-

**निदेशकः (केन्द्रीययोजनाः)**